Ex/SANS/PG/3.5A/2025

## MASTER OF ARTS EXAMINATION, 2025

**( 2nd Year, 3rd Semester )**

**SANSKRIT**

**COURSE : XV/A**

**[ Philosophy of Language]**

*Time* : 2 Hours *Full Marks* : 30

### विभागः – क

१. अधोलिखितं प्रश्नं सुरगिरा देवनागरीलिप्या च समाधेयम्–

“तस्य हि ध्वनेः स्वरूपं सकल–सत्कवि–काव्योपनिषदभूतम् अतिरमणीयम् अणीयसीभिरपि चिरन्तनकाव्यलक्षणविधायिनां बुद्धिभिरनुन्मीलितपूर्वम् .................... सहृदयानामानन्दो मनसि लभतां प्रतिष्ठाम् इति प्रकाश्यते”—

कस्मिन् प्रसङ्गे पंक्तिरियमुक्ता ग्रन्थकारेण? अत्र रेखांकितानां पदानाम् अर्थं तात्पर्यं च सुरगिरा लिखतु। ‘सहृदय’ इत्यस्य विषये अभिनवगुप्तेन किमुक्तम्? 1+1+1+1+1+1

२. अधोलिखितेषु प्रश्नेषु द्वयं समाधेयम्– 7×2=14

(क) “तथा हि आद्यस्तावत् प्रभेदो वाच्याद् दूरं विभेदवान्” — अस्याः पंक्तेः सोदाहरणं व्याख्या कार्या।

(ख) सरस्वती स्वादु तदर्थवस्तु

निःष्यन्दमाना महतां कवीनां

अलोकसामान्यमभिव्यनक्ति

परिस्फुरन्तं प्रतिभाविशेषम्।

— कारिकास्थितानां पदानां विश्लेषणद्वारेण कारिकायाः तात्पर्यं लिखतु।

(ग) उपोढरागेण विलोलतारकं

तथा गृहीतं शशिना निशामुखम्।

यथा समस्तं तिमिरांशुकं तया

पुरोऽपि रागाद् गलितं न लक्षितम्।।

— कस्मिन् प्रसङ्गे उक्तमिदम्? अस्य श्लोकस्य व्याख्या कार्या।

## विभागः – ख

१. अधोलिखितयोः कस्यचित् एकस्य उत्तरं लेखनीयम्। 5

(क) '.......अष्टौ स्फोटाः' स्फोटानामष्टविधत्वं नागेशमतानुसारेण नामतः लिखित्वा तेषु यथेच्छं द्वयोः स्वरूपं लिख्यताम्।

(ख) 'प्रकारान्तरेणापि सा द्विविधा' — सा इति पदेन का बोधिता? प्रकारान्तरेण तस्याः द्वैविध्यं नामतः लिखित्वा तयोः स्वरूपमपि सोदाहरणमालोच्यताम्।





२. अधोलिखितेषु पञ्चानां प्रश्नानामुत्तरं संस्कृतभाषया देवनागरीलिप्या च संक्षेपेण पूर्णवाक्येन च देयम्। 1×5=5

(क) नागेशभट्टस्य आविर्भावकालः लिख्यताम्।

(ख) रसगंगाधरग्रन्थस्योपरि नागेशभट्टेन रचितायाः टीकायाः नाम लिख्यताम्।

(ग) 'सा शक्तिस्त्रिधा' — अत्रोल्लिखितायाः शक्तेः त्रिधा विभागः नामतः लिख्यताम्।

(घ) रूढेः स्वरूपं सोदाहरणं लिख्यताम्।

(ङ) किं तादात्म्यम्?

(च) तार्किकमतानुसारेण लक्षणायाः स्वरूपं किम्?

(छ) 'तत्त्वमसि' — इत्यत्र कीदृशी लक्षणा समर्थनीया?

(ज) 'मञ्चाः हसन्ति' — इत्यत्र लक्षणायाः निमित्तं किम्?

★★★